E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.314

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि–सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# न्यायदर्शने प्रतिपादितप्रमेयाणां स्वरूपम्

**चण्डीप्रसादः**
**सहायकाचार्यः**
**दर्शनविद्याशाखा**
**के०सं०वि०वि०श्रीरघुनाथकीर्तिपरिसरः**
**देवप्रयागःउत्तराखण्डः**
**Email – bhattcp86@gmail.com**
**Contact no. 8310764304**

## ➢ शोधसारः(Abstract)

दर्शनं नाम वस्तुतत्त्वनिरूपकः श्रेष्ठपुरुषप्रवर्तितो विशिष्टशब्दसन्दर्भः । तथा चाऽह न्यायकोशकारः **"दर्शनं तत्त्वज्ञानसाधनं शास्त्रम्"** [1] इति । तच्च दर्शनं नास्तिकास्तिकभेदेन द्विविधम् । तत्र बौद्धचार्वाकादिदर्शनानि नास्तिकदर्शनानि । न्यायवैशेषिकसाङ्ख्ययोगपूर्वोत्तरमीमांसादर्शनानि आस्तिकदर्शनानि । एषु आस्तिकदर्शनेषु सर्वशास्त्रोपकारकत्वात् न्यायदर्शनस्य प्राधान्यं वर्त्तते । दर्शनशास्त्रस्य मूललक्ष्यं खलु मोक्षप्राप्तिः। न्यायदर्शनेऽपि तस्य व्यत्ययो न भवति । मोक्षलाभार्थमात्मादीनां द्वादशप्रमेयानामुपादेयत्वं प्रतिपादितम् ।द्वादशविधेषु प्रमेयेष्वात्मज्ञानं मोक्षसाधनत्वेन सुव्यवस्थितम् । न्यायसूत्रेषु प्रतिपादितेषु षोडशपदार्थेषु प्रमेयपदार्थः अत्यन्तमहत्त्वपूर्णः अस्ति, यतः सः ज्ञानस्य विषयभूतः अस्ति । तत्र भासर्वज्ञेनाभिहितं प्रमेयलक्षणं यथा **"यद्विषयं ज्ञानमन्यज्ञानानुपयोगित्वेनैव निःश्रेयसाङ्गं भवति, मिथ्याज्ञानञ्च संसारं प्रतनोति, तत्प्रमेयम्"[2]।** इति। अर्थात् यद्विषयकं ज्ञानमन्यज्ञानोत्पत्तौ अहेतुर्भूत्वा साक्षान्निःश्रेयसाङ्गं भवति । वात्स्यायनोऽपि **"योऽर्थः तत्त्वतः प्रमीयते तत्प्रमेयम्"** [3] इति । महर्षिगौतमो निम्नाङ्कितानि द्वादशविधानि प्रमेयाणि स्वीकरोति । यथा- **"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"**[4]इति । प्रमाविषय एव प्रमेयशब्देनाभिधीयते ।

---

[1]न्या०को० ।

[2]भा०स० ।

[3]वा० भा० ।

[4]न्या० सू०– १/१/९ ।

न्यायभाष्ये प्रमाणं यथा- **"अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसार इत्यत: एतदुपदिष्टं विशेषेण"**[5] इति । न्यायसारे प्रमेयलक्षणं लक्षितं यथा- **"यद्विषयं ज्ञानमन्यज्ञानानुपयोगित्वेनैव निःश्रेयसाङ्गं भवति तत् प्रमेयम्"**[6]इति। ईदृशसङ्क्षिप्तलक्षणस्य विस्तृततरूपेण न्यायभूषणे प्रतिपादने बीजं केवलविषयस्पष्टार्थमेव न अपितु वात्स्यायनोद्योतकरादिभिः महर्षिभिरपि तादृशप्रमेयकथनादपि तेन विस्तृततरूपेण **"यद्विषयं तत्त्वज्ञाननिःश्रेयसं तत्प्रमेयम्"** [7] इति व्याख्यातम्। विशेषतया दृष्टिः प्रसारणीया यत् केवलप्रमाविषयमात्रेण पदार्थस्य प्रमेयविषयत्वं न सम्भवति। विषयमिदं स्पष्टीकरोति भासर्वज्ञः यत् स एव प्रमा विषयः प्रमेयम् इति वक्तुं शक्यते। येन मोक्षं प्रति साक्षात्कारणत्वं स्यात् इति । न तु कीटसङ्ख्याद्यपि प्रमेयं तेषां ज्ञानस्य निःश्रेयसानुपयोगित्वात्" । इति । प्रमेयानि तानिभवन्ति यानि प्रमाणैः ज्ञायन्ते । अस्मिन् शोधपत्रेआत्मादि द्वादशप्रमेयानां स्वरूपं, तेषां तात्त्विकमहत्त्वं, मोक्षमार्गे तेषां भूमिका च विस्तारतः विविच्यते ।

## ➢ कूटशब्दाः (Key Words)

प्रमाणम्, प्रमेयम्, आत्मा, बुद्धिः, मनः, इन्द्रियम्, दोषः, प्रवृत्तिः,दुःखम्,अपवर्गः।

### उद्देश्यम् - (Objective)

1. प्रमेयपदार्थस्य लक्षणम्, स्वरूपं तथा तत्त्वतः विवेचनम् । प्रमेयस्य यथार्थलक्षणंनिरूप्य, तस्य स्वरूपं, ज्ञानविषयरूपेण तस्य स्थानं च स्पष्टयितुम्, तथा च प्रमाणैः सह तस्य सम्बन्धं प्रतिपादयितुम्।

2. द्वादशप्रमेयानां विस्तृतविवेचनं तथा तेषां परस्परसम्बन्धस्य निरूपणम् । आत्मादीनां द्वादशप्रमेयानां क्रमशः विश्लेषणं कृत्वा, तेषां कारण-कार्यसम्बन्धं, जीवनदर्शने तेषां योगदानं च स्पष्टयितुम्।

3. मोक्षप्राप्तौ प्रमेयज्ञानस्य भूमिकाया:तात्त्विकविश्लेषणम् । प्रमेयज्ञानं कथं दुःखनिवृत्तेः साधनं भवति, दोष-प्रवृत्ति-फल-दुःखादि निवृत्तौ तस्य महत्त्वं किमिति, तथा अपवर्गप्राप्तौ तस्य अनिवार्यता च विवेचयितुम्।

4. न्यायशास्त्रोक्तप्रमेयाणां लोकव्यवहारे कथम् आनयनं कर्तुं शक्यते इति ज्ञातुं शक्यते अनेन शोधपत्रेण।

5. न्यायशास्त्राध्येतॄणांकृते न्यायशास्त्रप्रवेशे महत्सौकर्य लाघवञ्च शोधपत्रोऽयं परिकल्पयिष्यति।

---

[5]न्या० भा०।
[6]न्या० सा०।
[7]वा०भा०।

## ➢ शोधलेख: (Research Paper)

### १.आत्मा

अन्नम्भट्टानुसारेण आत्मलक्षणमाह-**“ज्ञानाधिकरणमात्मा”**[8] इति। स आत्मा द्विविधः जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च इति। न्यायदर्शनानुसारेणात्मातीन्द्रियः, विभुः नित्यश्च वर्त्तते। तर्कभाषाकारेणाभिहितम् – **“तत्रात्मत्वसामान्यवान् आत्मा”** [9] इति। स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभूश्च। स च मानस प्रत्यक्षः। महर्षिगौतमेनोक्तम् **“इच्छाद्वेषप्रयत्न-सुखदुःखज्ञानान्यात्मनो लिङ्गमिति”**[10] । आत्मा प्रत्यक्षेण ग्रहीतुं न शक्यते। इन्द्रियसन्निकर्षायोग्यत्वादिति सः आत्मा किमाप्तोपदेशमात्रगम्य इत्याशङ्कते। उक्त प्रमेयेषु मध्ये नाप्तोपदेशमात्रगम्यः किं त्वनुमानगम्योप्यस्तीत्यर्थः। आत्मनोऽनुमानगम्यत्वप्रकारं जिज्ञासते कथमिति। अनुमेयस्यात्मनोनुमितिलिङ्गम्। इच्छादयः षट् पदार्था: आत्मानुमापकलिङ्गभूता: इति यथा इच्छादयः शरीरादिषु नोपपद्यन्ते मृतेष्वनुपलम्भात्। न वा मनस्युपपद्यन्तेगुण-भूतानामिच्छादीनामुत्पत्तौ मनसः करणत्वादिति पारिशेष्येण यत्रेच्छादयः समवायेनोत्पद्यन्ते स आत्मेति। आत्मा शरीराद्यतिरिक्तः इच्छादिमत्त्वाद् यन्नैवं तत्रैवमिति । यादृशमधुरादि-पदार्थस्येन्द्रियसन्निकर्षादात्मा सुखमुपलब्धवान् तज्जातीयमेव मधुरादिपदार्थ पश्यन् तं ग्रहीतुमिच्छति सेयमुपादनेच्छा पूर्वापरमधुरादिपदार्थदर्शिन एकस्य तत्पदार्थजन्यपूर्वसुखज्ञानस्य स्मरणात् सम्भवन्तीआत्मानुमाने लिङ्गं भवति। यद् येन हि दृश्यते तेनैव तत् कालान्तरे स्मर्तुं शक्यते नान्येन तथा चात्मनो नित्यत्वे पूर्वजन्मनि स्तन्यपानेनात्मना सुखमुपलब्धमिति जन्मान्तरे तत्स्मरणात् स्तन्यपानादाविच्छा संभवति नाऽनित्यात्मपक्षे एतच्छरीरादिना पूर्वजन्मनि स्तन्यपानजन्यसुखानुपलम्भेनैतज्जन्मनि तत्स्मरणासंभवात्। भवति च स्तन्यपानादाविच्छेति तदुपपत्त्यर्थं नित्य आत्माऽनेकशरीरग्राही स्वीकार्य इतीच्छालक्षणलिङ्गेन शरीराद्यतिरिक्त आत्मा सिद्ध इत्यर्थः ।

### २.शरीरम्

तर्कदीपिकाकारेणाभिहितम्- **“यदवच्छिन्नात्मनि भोगो जायते तदभोगायतनमित्यर्थ:”** [11] इति। वात्स्यायनोऽप्याह- **“आत्मनो भोगायतनं शरीरमिति”**[12] तर्कभाषाकारेणाभिहितम् -**"भोगायतनमन्त्यावयवि शरीरम्"**[13] इति। अर्थात् भोगः **"सुखदुःखान्यतरसाक्षात्कार:"** स च यदवच्छिन्न आत्मनि जायते तद् भोगायतनं तदेव शरीरम्।**“चेष्टाश्रयो वा शरीरम”**इति। अर्थात् चेष्टा तु **"हिताहितप्राप्तिपरिहारार्था क्रिया"** इति। शरीरस्य इन्द्रियाणामाश्रयत्वात् शरीरावच्छेदकसम्बन्धेन इन्द्रियाणामाश्रयो भवति शरीरम्। न तु समवायसम्बन्धेन तत्र भासर्वज्ञो कथयति "इन्द्रियाश्रयत्वं नेन्द्रियसमवायित्वं, किन्तु तदुपघातानुग्रहाभ्यामिन्द्रियाणां तथाभावस्तेनेन्द्रियाश्रयत्वं शरीरस्य। अर्थाश्रयत्वमपि तस्मिन् सत्येव तदवच्छिन्ने चात्मप्रदेशे सर्वेऽर्थाः सुखदुःखादिकं जनयन्तीति। वात्स्यायनेन सुखदुःखादय एव अर्थशब्दस्य परिभाषा दत्ता यथा- **"यस्मिन्नायतने**

---

[8]त०सं० , पृ०सं०१६।
[9]त०भा०, पृ०सं०१८१।
[10]न्या०सू०१/१/१/१०
[11]त०दी०, पृ०सं०४१।
[12]वा०भा०।
[13]त०भा०, पृ०सं२०२।

**इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स येषाम् आश्रयः तच्छरीरम्"[14]।** इति। नैयायिकाः द्विप्रकारकं शरीरं स्वीकुर्वन्ति-योनिजम् अयोजिनम् च। शुक्रशोणितयोः संयोगाज्जातं शरीरं योनिजमित्यभिधीयते। तद्भिन्नं शरीरमयोनिजमिति कथ्यते । मनुष्यपशुपक्षिणां शरीराणि योनिजानि भवन्ति । तैजसानि वायव्यानि च शरीराणि अयोनिजानि भवन्ति । महर्षिगौतमानुसारेण शरीरस्य लक्षणम् **"चेष्टेन्द्रियार्थाश्रयः शरीरम्"[15]।** इति। अर्थात् भोगाधिष्ठानं शरीरे एव भोगसंभवादित्येवम्। सुखदुःखादिभोगानां च य: आश्रयस्तच्छरीरम्। अर्थपदेन गन्धादिग्रहणे ते भोग्यानां गन्धादीनां भोगाधिष्ठानत्वसंबन्धेन शरीरवृत्तित्वं विज्ञेयमिति । शरीरस्य चेष्टाश्रयत्वं जिज्ञासते कथमिति । पदार्थमधिकृत्य उद्दिश्य वा तादृशपदार्थस्येप्साजिहासाभ्यां प्रेरितस्यात्मनः पदार्थप्राप्तिपरित्यागोपायानुष्ठानस्वरूपा समीहाशब्दवाच्या चेष्टा। सा चेष्टात्मनो यत्र वर्त्तते तच्छरीरमिति चेष्टाश्रयः शरीरमिति सिद्धम्। शरीरे एव स्थितस्यात्मनो चेष्टासंभवात्। इन्द्रियाश्रयत्वं जिज्ञासते इन्द्रियाणामाश्रयः स्थूलं शरीरं नेति सिद्धान्तेन जिज्ञासा। शरीरस्य रूपादिषु ज्ञेयानां साधुत्वं यथा भगवत्प्रतिमारूपस्य अज्ञेयानामसाधुत्वं यथा ह्यगम्यास्तनादिरूपस्य प्रवर्तन्ते इन्द्रियाणि, एषामिन्द्रियाणाम्, शरीरोपकारादिनैवेन्द्रियाणामुपकारादिकं संभवतीति स्वोपकारादिनोपकारकत्वादिनैव शरीरस्येन्द्रियाश्रयत्वमित्याशयः। तथा च "शरीरानुविधानमिन्द्रियाश्रयत्वं ब्रूमो न पुनराधाराधेय-भावेनेन्द्रियाणि शरीरे वर्त्तन्ते" इति। इति शरीरस्यार्थाश्रयत्वं जिज्ञासते। भोग्या गन्धादयः पुष्पादिनिष्ठास्तज्जन्याः सुखादयश्चात्मनिष्ठा भवन्ति न शरीरस्था इत्याशङ्कया जिज्ञासा। यस्मिन् शरीरलक्षणस्थाने स्थितस्यात्मन इन्द्रियार्थसन्निकर्षादुत्पन्नयोरर्थपदवाच्ययोः सुख-दुःखयो: प्रत्येकज्ञानेन स्मरणेन वा भोगेन वाऽयमात्मा प्रवर्त्तते इति। हेतोरेव तस्य शरीरस्यार्थाश्रयत्वं किं वा शरीरे स्थित्वैव सुखाद्यर्थभोगसंभवात् शरीरस्यार्थाश्रयत्वमुच्यते न त्वाधारत्वेनेत्यर्थः। अत्र "न हि गन्धादयोऽर्थाः शरीरवृत्तयः यत्तु येषां कार्य सुखदुःखो-पलब्धिनिमित्तत्वं तन्नाऽसति शरीरे भवतीति शरीराश्रया उच्यन्ते" इति। तदत्रार्थशब्देन विषयो वा तज्जन्यभोगो वा ग्राह्यः उक्तप्रवृत्याश्रयः शरीरम्। इति।

## ३. इन्द्रियाणि

पदार्थचन्द्रिकानुसारेण इन्द्रियाणां लक्षणं यथा **"साक्षात्कारमात्रवृत्तिधर्मावच्छिन्न-कार्यतानिरूपितकारणताश्रयव्यापारवदतीतिन्द्रयम्"** [16] इति। तर्ककौमुद्यानुसारेण **"शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियम्"**[17]। इति। तर्कभाषाकारेणाभिहितम्-**"शरीरसंयुक्तं ज्ञानकरण-मतीन्द्रियम्"**[18]। इति।तत्र **"घ्राणरसनचक्षुस्त्वक् श्रोत्राणीन्द्रियाणि भूतेभ्यः"**[19] इति इन्द्रियाणां सामान्य-लक्षणम्। सुखादिभोगकरणानि यानि तानीन्द्रियाणीत्यर्थः।

इन्द्रियाणि प्रमुखतया द्विप्रकारकाणि सन्ति ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि। उभयप्रकारकाणीमानीन्द्रियाणि पञ्च पञ्च प्रकारकाणि सन्ति। तत्र ज्ञान प्रसरणशक्तानीन्द्रियाणि श्रोत्रचक्षुर्घ्राणरसनात्वक्नामानि मनसा च स

[14]वा०भा०।

[15]न्या०सू०१/१/११।

[16]प०च।

[17] त० कौ० ।

[18]त० भा० , पृ० सं० २०५ ।

[19]बा०व्यु०।

षट्सङ्ख्याकानि भवन्ति। कर्मेन्द्रियाण्यपि पञ्चवाक्पाणिपादपायूपस्थाख्यानि। इमानीन्द्रियाण्येव भोगसाधनानि सन्ति। इति।

### ४. अर्थाः

वात्स्यायनः पृथिव्यादीनां गन्धादिगुणानेव इन्द्रियार्थाः इति स्वीक्रियते। यथा-**"पृथिव्यादीनां यथाविनियोगं गुणैरिन्द्रियाणां यथा क्रममर्थाः"** [20] इति। महर्षिगौतमेनोक्तम् यथा- **"गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः"**[21] इति। इमे गन्धादयः। घ्राणा-दीन्द्रियग्राह्यत्वादिति। पृथिव्यादीनां यथाविनियोगं यथासंख्यं गन्धादयो गुणास्ते एवेन्द्रियाणां यथासंख्यं विषयाः यथा घ्राणस्य गन्धो रसनायाः रस इति। द्रव्येषु पृथिव्यप्तेजसां चक्षुर्ग्राह्यत्वं त्वग्ग्राह्यत्वं च वायोश्च त्वग्ग्राह्यत्वमिति विज्ञेयम्। पृथिव्यादिगुणाः इत्यत्र पृथिव्यादयश्च गुणाश्चेति। पृथिव्यादीनामपि प्राणादिग्राह्यत्वं प्रसज्येतिदोषोऽनुसंधेयः। इति।

### ५. बुद्धिः

तर्कसङ्ग्रहकारेणाभिहितम्- **"सर्वव्यवहारहेतुर्गुणोबुद्धिर्ज्ञानम्"**[22] इति सा बुद्धिर्द्विविधा – स्मृतिरनुभवश्च। तर्कदीपिकानुसारेण **"जानामीत्यनुव्यवसायगम्यज्ञानत्वम्"**[23]इति। सप्तपदार्थी-कारेणानुसारेण **"आत्माश्रयः प्रकाशः"**[24] इति। जिनवर्द्धनानुसारेण "अज्ञानान्ध-कारतिरस्कारकारकसकलपदार्थस्यार्थप्रकाशः प्रदीप इव देदीप्यमानो यः प्रकाशः सा बुद्धिः"इति। तर्कभाषाकारेणाभिहितम् यथा**"बुद्धिरूपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्या-ऽभिधीयते सा बुद्धिः"**[25] इति। "अर्थप्रकाशो वा बुद्धिः"। बुद्ध्यते अनया इति हि बुद्धिशब्दस्य व्युत्पत्तिः। बुद्धिरियमात्मगुणस्वरूपा भवति। नैयायिकानुसारेण बुद्धिः द्विप्रकारवती भवति नित्या अनित्या च। तत्र नित्या बुद्धिः परमात्मनो भवति, अनित्या बुद्धिः जीवानां भवति। न्यायसूत्रकारेणाभिहितम् **"बुद्धिरूपलब्धिर्ज्ञानमित्यऽनर्थान्तरम्"**[26] इति। सांख्यैरुक्तम्- **"अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्"**[27] इत्यादिना कतृत्वरहितस्य चेतनस्यात्मनि उपलब्धिरेवेत्यपि सांख्यैरुक्तम्- **"तस्माच्च विपर्ययात् सिद्धं साक्षित्वमस्य पुरुषस्य कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च"**[28] इत्यादि तदेतद् युक्तिविरुद्धं बुद्धिज्ञानोपलब्धिशब्दानामेकार्थबोधकत्वात् तथा चात्मनि उपलब्धिसंभवे बुद्धिज्ञाने अपि प्राप्ते एव।

---

[20]वा०भा०।
[21]न्या०सू० , १/१/१४।
[22]त०सं० , पृ०सं०८०।
[23]त०दी० , पृ०सं०५४।
[24]स०प०।
[25]त०भा० , पृ०सं०३१८।
[26]न्या०सू०१/१/१५।
[27]सां०त०कौ०।
[28]सां० त० कौ० ।

## ६. मनः

मनस्यति अनेन इति मनः। तर्कसङ्ग्रहकारेणाभिहितम्- **“सुखाद्युपलब्धिसाधनमिन्द्रियं मनः”**[29] इति। तच्च मनः प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च। तर्कदीपिकाकारेणाभिहितम्- **“स्पर्शरहितत्त्वे सति क्रियावत्त्वं मनसो लक्षणम्”** [30] इति । सिद्धान्तचन्द्रोदयकारेणाभिहितम्- **“सुखादिसाक्षात्कारः करणसाध्यः जन्यसाक्षात्कारत्वाच्चाक्षुषसाक्षात्कारवत्”** [31] इति। महर्षिकणादानुसारेण **“आत्मेन्द्रियार्थसनिकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्”**[32] इति। मीमांसकाभिहितम् “मनो विभुः स्पर्शात्यन्ताभाववत्त्वादाकाशवत्, अथवा मनो विभुः विशेषगुणशून्यद्रव्यत्वात् कालवत्, अथवा मनो विभुः ज्ञानसमवायिकारणसंयोगाधारत्वादात्मवत्” इति। महर्षिगौतमेनोक्तम्-**“युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्”**[33] इति। अर्थात् स्मृतिर्हि आत्मनः आन्तरक्षानलक्षणा क्रिया सा चेन्द्रियलक्षणं करणं बिना न संभवति तस्मात् स्मृतेर्यदान्तरमिन्द्रियं करणं तदेव मनः। साध्यस्मृतिश्च समता सा च मनो विना नोपपद्यते इत्यनुमानमपि मनोलिङ्गम्। शब्दप्रमाणं शब्देन पदार्थे प्रमीयमाणे शक्तिग्रहस्मृत्यपेक्षा भवति सा च मनो विना नोपपद्यते इत्यागमोपि मनोलिङ्गम्। **“स्थाणुर्वा पुरुषो वा”**इत्यादिसंशयस्थले स्थाणुपुरुषयोः समानधर्माणां स्मृतिर्भवति तदनन्तरं संशयः स्मृतिश्च मनो विना नोपपद्यते इति संशयोपि मनोलिङ्गम्। **“श्वो मे भ्राताऽऽगन्ता”** इत्यादिरूपं प्रातिभं ज्ञानं तच्च स्वविषयस्य भ्रात्रादेः स्मृतिं विना नोपपद्यते स्मृतिश्च मनो विना नोपपद्यते इति प्रतिभाति मनोलिङ्गम्। स्वप्नज्ञानमपि दृश्यमानेनन्द्रियसंनिकर्षाद्यभावात् स्मृतिरूपमेवेति मनो बिना नोपपद्यते इति स्वप्नज्ञानमपि मनोलिङ्गम्। **“यद्यत्र वह्निर्न स्यात्तदा धूमोपि न स्यात्”** इत्यादिरूपस्तर्कः स च वह्निस्मृतिसापेक्षः स्मृतिश्च मनो विना नोपपद्यते इति ऊहोपि मनोलिङ्गम्। एषूदाहरणेषु स्मृतेरेव साक्षाद् मनस्साधकत्वं विज्ञेयं प्रपञ्चस्तु व्युत्पत्त्यर्थः। सुखादिप्रत्यक्षं ह्यात्मनो मनः करणकमेव स्वकीयसुखादौ प्रमाणान्तरप्रसारासंभवादिति यदेव सुखप्रत्यक्षकरणं तदेव मनः। आदिपदात् दुःखादिकं ग्राह्यम्। इच्छादयोप्यात्मव्यापाराः सकरणका एव तत्र बाह्यस्त करणत्वासंभवाद् यदेवेच्छादि-व्यापारकरणं तदेव मनः। मनः शब्दवाच्यमान्तरमिन्द्रियमस्ति तेन विना स्मृत्यादीनामनुपपत्तेः किं वा स्मृत्यादयः सकरणका व्यापारत्वाद् बाह्यव्यापारवद् यदेव स्मृत्यादिकरणं तदेव मनः इति स्मृत्यादीनि मनोलिङ्गानि। स्मृत्यादिलक्षणलिङ्गेषु सत्स्वपि इयं युगपज्ज्ञानानुत्पत्तिरपि मनसो लिङ्गं भवति। इति।

## ७. प्रवृत्तिः

तर्ककौमुदीकारेणाभिहितम् **“चिकीर्षाजन्यो यत्नः प्रवृत्तिः”**[34] इति। तर्कभाषाकारेणाभिहितम् –**“प्रवृत्तिः धर्माऽधर्ममयी यागादिक्रिया तस्या जगद्व्यवहारसाधकत्वात्”**[35] इति। प्रवृत्तयः त्रिप्रकारवत्योः भवन्ति शारीरिकी, मानसिकी, तथा वाचिकी। इमास्त्रिस्रः एव प्रवृत्तयः पुण्यपापयोर्भेदेन द्विधा भवन्ति।

---

[29]त०सं० , पृ०सं०५४।

[30]त० दी० , पृ० सं० ५४ ।

[31]सि० चं० ।

[32]वै०सू०।

[33]न्या०सू० , १/१/१६ ।

[34]त०कौ०।

[35]त०भा० , पृ०सं०३२८।

महर्षिगौतमेनोक्तम् यथा **“प्रवृत्तिर्वाग्बुद्धि-शरीरारम्भः इति”**[36] अर्थात् वाग्बुद्धिशरीराणामारम्भः क्रिया प्रवृत्तिरित्युच्यते। प्रवृत्तिश्च सा धर्माधर्माविति ।

## ८. दोषाः

भासर्वज्ञेनाभिहितम्- **“विहिते प्रतिषिद्धे च पुरुषं प्रवर्तयन्तीति प्रवर्तना रागद्वेषमोहाः”**[37] इति। तर्कभाषाकरेणाभिहितम् **“दोषाः - राग,द्वेष,मोहाः”**[38] इति। राग = इच्छा। द्वेषो = मन्युः क्रोधः इति यावत्। मोहो मिथ्याज्ञानं विपर्यय: इति यावत्। महर्षि गौतमेनाभिहितम् –**“प्रवर्तनालक्षणा दोषाः”**[39]।इति। अर्थात् प्रवर्तकत्वमेव लक्षणं स्वरूपं येषां ते प्रवर्तनालक्षणा दोषाः रागादय इति। दोषाणां प्रवर्तकत्वं च व्याचष्टे । तथा च प्रवृत्तिहेतुत्वलक्षणा दोषाः इति। पुण्यपापकारणीभूता: दोषा: इत्यर्थः। दोषाणां यत्रात्मनि मिथ्याज्ञानं भवति तत्रैवात्मनि तेन मिथ्याज्ञानेन रागद्वेषमोहा दोषा: भवन्ति। मिथ्याज्ञानं चाविद्या सा च **“अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्या[40]”** इत्युक्ता। दोषनिरूपणकारणं जिज्ञासते अप्रसिद्धस्य हि ज्ञानार्थं लक्षणापेक्षा भवति। रागादयो दोषाश्च प्रत्यात्मवेदनीयाः प्रत्यात्मप्रसिद्धाः, सकलजीवप्रसिद्धा: इति नैषां लक्षणापेक्षेत्यर्थः।

## ९. प्रेत्यभावः

न्यायभाष्यकारेणाभिहितम् **“उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः”**[41] इति। तत्र भासर्वज्ञः वक्ति यत् **“पूर्वोपात्तं शरीरादिकं हित्वा पुनः शरीराद्यन्तरप्राप्तिरात्मनः प्रेत्यभावः मृत्वा पुनर्जन्मेत्यर्थः”**[42] इति। न्यायवार्तिककारेणाभिहितम्**“पुनर्ग्रहणं संसारस्य अनादित्वज्ञापनार्थम्”**[43] इति। महर्षिगौतमेनाभिहितम् **“पुनरुत्पत्तिः प्रेत्यभावः”**[44] इति। अर्थात् मरणानन्तरं जन्म स प्रेत्यभावः। शरीरेन्द्रियसंघाते उत्पन्नस्य जीवस्य मरणानन्तरं योत्पत्तिः सा पुनरुत्पतिः स एव प्रेत्यभाव: इत्युच्यते। ननूत्पत्तिस्तु शरीरस्यैव संभवति नात्मनः नित्यत्वात् शरीरं च यदुत्पन्नं तदत्रैव भस्मीभूतं नष्टमिति न शरीरस्यापि पुनरूत्पत्तिरूपपद्यते इत्याशङ्क्य उत्पन्नस्येतिपदं संबद्धस्येति। तथा च क्वचित् सत्त्वनिकाये उत्पन्नस्य आत्मनो नित्यत्वेनैवाऽनेकशरीरैः सह संबन्धस्तु नानुपपन्नः शरीरस्य तु पुनरूत्पत्तिनोच्यते। देहेन्द्रियादिभिरात्मनो यः पुनः संबन्धः स एव प्रेत्यभाव: इत्यर्थः।

## १०. फलम्

---

[36]न्या०सू०१/१/१७।

[37]भा०स०।

[38]त०भा० ,पृ०सं० ३२८।

[39]न्या०सू०१/१/१८।

[40]यो०सू०२/५।

[41]न्या०भा०।

[42]भा०स०।

[43]न्या०वा०।

[44]न्या०सू१/१/१९।

तर्कभाषाकारेणाभिहितम्- **“फलं पुनर्भोगः सुखदुःखान्यतरसाक्षात्कारः”**[45]इति। महर्षि-गौतमेनाभिहितम् **“प्रवृत्तिदोषजनितोऽर्थः फलम्”**[46]इति । न्यायदर्शनानुसारेण फलं द्विविधं भवति - मुख्यं गौणञ्च। अतः सुखदुःखयोः संवेदनरूपं फलमेव मुख्यम्। तद्व्यतिरिक्तं गौणम्। यथा धर्माधर्माभ्यां रागद्वेषादिदोषैश्च जनितः सुखदुःखभोग एव फलपदार्थः। शरीरादिकमपि गौणं फलमेव प्रवृत्तिजन्यत्वात्। यद्यपि फलस्य प्रवृत्तिजन्यत्वमेव तथापि रागद्वेषादिदोषैर्विना सुखादिभोगो न संभवतीतिहेतोरेव दोषाणामपि फलहेतुत्वमुक्तम्। अत्र च प्रवृत्तिजनितः इति वक्तव्ये दोषग्रहणं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुर्भावोऽपि तुप्रवृत्तिकार्ये सुखदुःखे अपि प्रतीतिदर्शनार्थं दोषसलिलावसिक्तायां खल्वात्मभूमौ धर्माधर्मबीजे सुखदुःखेजनयतो नान्यथा इति।

सुखदुःखयोः भोग एव प्रधानं फलम्। सुखजनकं पुण्यं, दुःखजनकं च पापं कर्म तच्च सुखदुःखसंवेदनं देहादीनां सत्त्वे एव संभवति नान्यथेति फलं देहादिभिः सहैवाभिप्रेतम् अर्थात् यथा सुखदुःखभोगः फलं तथा देहादिकमपि फलमेव धर्माधर्मजन्यत्वात्। एवं सुखदुःखसंवेदनेन सह देहादेरपि फलत्वस्वीकारात्। इति।

## ११. दुःखम्

अन्नम्भट्टानुसारेण दुःखस्य लक्षणं**“सर्वेषां प्रतिकूलवेदनीयं दुःखम्”**[47] इति। विरलानुसारेण दुःखस्य लक्षणं **“अनिष्टसाधनताज्ञानानधीनद्वेषविषयत्वं दुःखस्य लक्षणम्”** [48] इत्यर्थः। पदकृत्यानुसारेण यथा- **“अधर्ममात्रासाधारणकारणो गुणो वा दुःखम्”**[49]इति। तर्कभाषाकारेणाभिहितम्- **“पीडा दुःखम्”**[50] इति। महर्षिगौतमेनोक्तम् दुःखस्य लक्षणं-**“बाधनालक्षणं दुःखम्”**[51] इति। अर्थात् पीडास्वरूपं सद् दुःखमित्युच्यते। तत्र वस्तुतो दुःखमात्मसमवेतमेव अथापि तादृशदुःखजनकत्वात् शरीरादिकमपि दुःखमित्युच्यते इति। अत्र **“एतदेव शरीरादिबाधनानुषङ्गात् दुःखमित्युच्यते स्वभावतस्तु दुःखमेव दुःखम्”** [52] इति न्यायवार्तिककारेणाभिहितम्। व्याचष्टे तया अनुषक्तं दुःखजनकमितियावत्। दुःखसाहित्येन वर्तमानं सर्वमेव शरीरादिकं दुःखयोगाद् दुःखमित्युच्यते यथा मधुरसंयोगाद् मधुरमित्युच्यते तथासोयं दुःखी सर्वे दुःखयुक्तमिति जनानां दुःखस्यानिष्टत्वाद् दुःखं जिहासुर्जन्मनि दुःखदर्शी संसाराद् निर्विद्यते निर्विण्णः सन् विरच्यते विरक्तः सन् अपवर्गपदं लभते इति। तथा च संसारे किंचित्सुखे सत्यपि अपवर्गसाधनीभूतनिर्वेदस्य सिद्ध्यर्थं सर्वस्य दुःखमयत्वमुच्यते। महर्षि पतञ्जलिमतानुसारेण दुःखस्य लक्षणम्- **“परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः”**[53] इति।

नैयायिकमतानुसारेण दुःखस्यैकविंशतिभेदाः भवन्ति एकं शरीरम्, षडैन्द्रियकम्, षड्वैषयिकम्, षट् प्रत्यक्षम्, सुखं, दुःखञ्चेति। भोगायतनत्वादेव शरीरं दुःखमित्यभिधीयते। इति।

---

[45]त०भा० , पृ०सं०३२९।

[46]न्या० सू १/१/२० ।

[47]त०सं० , पृ० सं० ९७।

[48]त० सं० वि०, पृ० सं० ९७ ।

[49]त० सं० प०, पृ० सं० ९७ ।

[50]त०भा०, पृ० सं० ३२९ ।

[51]न्या०सू , १/१/२१।

[52]न्या०वा०।

[53]यो० सू० २/१५।

## १२. अपवर्गः

यथा न्यायसूत्रम्"**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः"**[54] इति। तर्कभाषाकारेणाभिहितम् **"मोक्षोऽपवर्गः"**[55] **इति। "एकविंशतिभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः मोक्षः"**[56]इति। एकविंशतिप्रभेदास्तु शरीरं, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः सुखं, दुःखञ्चेति। तथा च उक्तम् वात्स्यायनभाष्ये-"यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषाः अपयान्ति, दोषापाये प्रवत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमपैति , दुःखापाये च आत्यन्तिकोऽपवर्गो निःश्रेयसम्''इति।

महर्षिगौतमेनाभिहितम्- **"तदत्यन्तविमोक्षोऽपवर्गः"** [57] इति। अर्थात् दुःखस्याऽत्यन्तविमोक्षः दुःखनिवृत्तिर्भवति तद्व्यावृत्त्यर्थमऽत्यन्तपदं प्रलयानन्तरं सर्गे पुनर्दुःख-भोगस्याऽवश्यम्भावाद् न प्रलयेऽत्यन्तदुःखनिवृत्तिः संभवति अपवर्गानन्तरं तु न दुःखभोग-संभवोऽस्तीत्यपवर्गे दुःखस्यात्यन्तनिवृत्तिः संभवति। दुःखनिवृत्तेरात्यन्तिकत्वं च पुनरुत्पाद् इति।

## ➢ निष्कर्षः (Conclusion)

कस्यचनअपि विषयस्यैव ज्ञानं भवति। विषयं बिना ज्ञानं न भवति निर्विषयकस्य ज्ञानस्यानुपलब्धेः। ज्ञानस्य व्यापारो यस्मिन् विषये फलितो भवति स एव प्रमेयशब्दवाच्यो भवति। घटपटादयः सर्वे विषयाः येषां ज्ञानं सम्पद्यते ते सर्वेऽपि प्रमेयशब्देनाभिधीयन्ते।अस्य शोधपत्रस्य समग्रपरिशीलनेन स्पष्टतया अवगम्यते यत् न्यायदर्शने प्रतिपादिताः प्रमेयपदार्थाः तत्त्वज्ञानस्य आधारभूताः स्तम्भाः सन्ति। प्रमाणैः ज्ञेयत्वात् प्रमेयाणां यथार्थस्वरूपावबोधः ज्ञानप्रक्रियायाः अनिवार्याङ्गत्वेन प्रतिष्ठितः। आत्मादीनां द्वादशप्रमेयानां निरूपणेन न केवलं पदार्थानां वर्गीकरणं क्रियते, अपि तु जीवस्य अस्तित्वं, तस्य बन्धः, तथा मोक्षमार्गः इति सर्वेऽपि विषयाः सुव्यवस्थितरूपेण प्रकाश्यन्ते।

आत्मा चेतनद्रव्यरूपेण कर्तृत्वभोक्तृत्वयोः आश्रयः इति निर्णीयते, शरीरं तस्य भोगसाधनत्वेन, इन्द्रियाणि ज्ञानोपकरणत्वेन, अर्थाः विषयत्वेन, बुद्धिः ज्ञानरूपत्वेन, मनः अन्तःकरणरूपेण च स्वस्वस्थानानि धारयन्ति। दोषाः रागद्वेषमोहात्मकाः जीवस्य संसारबन्धस्य मूलकारणानि भवन्ति, तैः प्रेरिता प्रवृत्तिः कर्मणां जननी भवति, कर्मणः फलोत्पत्तिः, ततः सुखदुःखयोः अनुभूतिर्भवति। अयं दुःखपरम्परारूपः संसारः अनादिनिधनः इति स्वीकृतः।

एवं सति, अस्य दुःखचक्रस्य आत्यन्तिकीनिवृत्तिः "अपवर्गः" इति निर्दिश्यते, यः मनुष्यजीवनस्य परमपुरुषार्थः अस्ति। एषः अपवर्गः केवलं तत्त्वज्ञानस्य माध्यमेनैव साध्यते। तत्त्वज्ञानं च प्रमेयपदार्थानां यथार्थज्ञानमेव इति न्यायसिद्धान्तः अत्र सुस्पष्टः भवति।

[54]न्या०सू० १/१/२।

[55]त० भा० , पृ० सं० ३३० ।

[56]वा०वा०।

[57]न्या० सू० १/१/२२ ।

अतः निःसंशयं प्रतिपद्यते यत्—प्रमेयविचारः न केवलं सैद्धान्तिकः, अपि तु व्यावहारिक, नैतिक, आध्यात्मिकदृष्ट्या अपि अत्यन्तोपयोगी अस्ति। सः जीवस्य आत्मबोधं जनयति, दोषपरित्यागे प्रेरयति, दुःखनिवृत्तेः मार्गं प्रकाशयति, अन्ततः अपवर्गप्राप्तौ सहायकरूपेण प्रतिष्ठते।

निष्कर्षतः प्रतिपद्यते—**"प्रमेयानां यथार्थज्ञानमेव मोक्षमार्गस्य मूलं साधनम्, तदेव न्यायदर्शनस्य सारतत्त्वम्"**।इतिशम्।

## सन्दर्भग्रन्थसूची (References)


१. अन्नम्भट्टः, तर्कसङ्ग्रहः, तेन विरचितं दीपिका व्याख्या समलङ्कृतम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९९०।

२. उदयनः, न्यायवार्तिकतात्पर्यटीकापरिशुद्धि, सम्पादकः – विन्ध्येश्वरी प्रसाद द्विवेदी,चौखम्बा संस्कृत सीरीज आफिस, वाराणसी,२०००।

३. उद्योतकरः, न्यायवार्तिकम्, चौखम्बा संस्कृत भवन, वारणासी, प्रथम संस्करणम्, १९८७।

४. केशवमिश्रः, तर्कभाषा, गणेशदीक्षितविरचित तत्त्वबोधिनी व्याख्यायां समलङ्कृतम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २००५।

५. पतञ्जलिः, योगसूत्रम्, चौखम्बा संस्कृत संस्थानम्, वाराणसी, १९८७।

६. भासर्वज्ञः, न्यायभूषणम्, चौखम्बा विद्याभवनम् , वाराणसी, २०००।

७. भासर्वज्ञः, न्यायसारः, वासुदेवसूरी विरचित व्याख्योपेतः संजय प्रकाशन्, दिल्ली, २००५.

८. भीमाचार्यः, न्यायकोशः, भण्डार्कर ओरियन्टल् रिसर्च इन्स्टिट्यूट्, पूणे, २००२।

९. वात्स्यायनः, न्यायभाष्यम्, बौद्धभारती, वाराणसी, १९९८।

१०. विश्वनाथ न्यायपञ्चाननः, न्यायसिद्धान्तमुक्तावली, बालप्रिया हिन्दी व्याख्या, आलोक संस्कृत हिन्दी व्याख्यया समलङ्कृता व्याख्याकारौ डॉ गजानन शास्त्री मुसलगाँवकर, आचार्य लोकमणिदाहाल, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १०९९।

११. महर्षिगौतमः, न्यायसूत्रम् , वात्स्यायनीयन्यायभाष्यसहितम्, भाष्योपरि महामहोपाध्याय-सर-गङ्गानाथझा-विरचित 'खद्योत' अम्बादासशास्त्रिकृतटिप्पणीगर्भित-आचार्य-रघूत्तमविरचित 'भाष्यचन्द्र' टीकाभ्यां च विभूषितम्,चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

१२. शिवादित्यमिश्रः, सप्तपदार्थ, यूनिवेसल् वोयिस् दिल्ली, १९३३।

१३. महर्षिकणाद-विरचितंवैशेषिक-दर्शनम् 'प्रकाश' हिन्दीव्याख्या-विभूषितम्, चौखम्बा संस्कृत संस्थान, वारणासी।

१४. गणेशदत्तशास्त्री (सम्पादकः) — तर्ककौमुदी टीकासहिता, चौखम्बा-प्रकाशनम्, वाराणसी।

१५. सुरेन्द्रनाथदासगुप्तः — भारतीयदर्शनस्य इतिहासः, कैम्ब्रिज्-विश्वविद्यालय-प्रकाशनम्।

१६. चन्द्रधरशर्मा — भारतीयदर्शनम्, मोतीलाल-वनारसीदास-प्रकाशनम्, दिल्ली।

१७. गङ्गेशोपाध्यायः — तत्त्वचिन्तामणिः, मिथिला-परम्परया प्रकाशितः।

१८. उदयनाचार्यः — न्यायकुसुमाञ्जलिः, चौखम्बा-प्रकाशनम्, वाराणसी।